

# बुध कवच स्तोत्र

अस्य श्रीबुधकवचस्तोत्रमंत्रस्य कश्यप ऋषिः।
अनुष्टुप् छंदः। बुधो देवता।
बुधपीडाशमनार्थं जपे विनियोगः॥

बुधस्तु पुस्तकधरः कुंकुमस्य समद्दुतिः।
पितांबरधरः पातु पितमाल्यानुलेपनः ॥१॥

कटिं च पातु मे सौम्यः शिरोदेशं बुधस्तथा।
नेत्रे ज्ञानमयः पातु श्रोत्रे पातु निशाप्रियः ॥२॥

घ्राणं गंधप्रियः पातु जिह्वां विद्याप्रदो मम।
कंठं पातु विधोः पुत्रो भुजा पुस्तकभूषणः ॥३॥

वक्षः पातु वरांगश्च हृदयं रोहिणीसुतः।
नाभिं पातु सुराराध्यो मध्यं पातु खगेश्वरः ॥४॥

जानुनी रौहिणेयश्च पातु जंघेऽखिलप्रदः।
पादौ मे बोधनः पातु पातु सौम्योऽखिलं वपु ॥५॥

एतद्धि कवचं दिव्यं सर्वपापप्रणाशनम्।
सर्व रोगप्रशमनं सर्व दुःखनिवारणम् ॥६॥

आयुरारोग्यधनदं पुत्रपौत्रप्रवर्धनम्।
यः पठेत् श्रुणुयाद्वापि सर्वत्र विजयी भवेत् ॥७॥

॥ इति श्रीब्रह्मवैवर्तपुराणे बुधकवचं संपूर्णं ॥
॥ श्री ब्रह्मवैवर्त पुराण में बुध कवच संपूर्ण हुआ ॥

हिंदीपथ.कॉम – HindiPath.com